# Shri Chidambara Shivashakti Dhvani Mantra Stava

# શ્રીચિદમ્બર શિવશક્તિ ધ્વનિ મન્ત્રસ્તવઃ

## Document Information

Text title : Shri Chidambara Shivashakti Dhvani Mantra Stava

File name : chidambarashivashaktidhvanimantrastavaH.itx

Category : shiva, mantra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રીચિદમ્બર શિવશક્તિ ધ્વનિ મન્ત્રસ્તવઃ

શ્રીગણેશાય નમઃ ।
શ્રીચિત્સભેશાય નમઃ ।
ૐ હ્રીં એહ્યેહિ શિવ શિવ શરણં શિવાનન્દ
શિવ શિવ શિવાય શિવાય નમઃ એહ્યેહિ હ્રીં ૐ ।

વાશ્ચારેટ્-ધ્વજધક્-ધૃતોડ્વધિપતિઃ કુધ્રેડ્જજાનિર્ગણેટ્
ગોરાડારુરુડુરસ્સરેડુરુતરગ્રૈવેયકભ્રાડરમ્ ।
ઉડ્વીડુડ્નરકાસ્થિસૃક્ત્રિદૃગિભેડાર્દ્રાજિનાચ્છચ્છદઃ
સસ્તાદમ્બુમદમ્બુદાલિગલરુડ્દેવો નટાધીશ્વરઃ (૧) ॥ ૧॥

(૧. વાશ્ચારેટ્ - વારિચરેશો મકરઃ । મકરધ્વજધક્ - કામદાહકઃ । ધૃત-
ઉડુ - અધિપતિઃ -ચન્દ્રકલાધરઃ । કુધ્રાઃ - પર્વતાઃ, તદીશો હિમવાન્,
તજ્જાયાઃ ભર્તા । ગણાનામીશઃ । ગોરાટ્ -વૃષભઃ, તં આરુરુટ્ આરૂઢઃ ।
ઉરસ્સરાણાં સર્પાણાં ઈશઃ । સ એવ ઉરુ તરં બૃહત્, ગ્રૈવેયકં તેન ભ્રાજતે । ઉડૂનાં
ઈશસ્ય રોગો યક્ષ્મા, નરશિરોઽસ્થ્નાં માલા ચ યસ્ય સ્રક્ - માલા । ત્રિદૃક્ -
ઘ્યક્ષઃ । ઇભેટ્ - ગજરાજઃ, તચ્ચર્મધરઃ । અમ્બુમદમ્બુદાલિ ગલરુક્
મેઘવન્નીલકણ્ઠરુચિઃ । સઃ અરં શરણં સ્તાત્ ।)
પ્રલયાગ્નિપ્રભં રૌદ્રં સહસ્રશિરસા યુતમ્ ।
દ્વિસહસ્રકરં દીર્ઘં સકલાયુધપાણિકમ્ ॥ ૨॥

સાટ્ટહાસં મહાભીમં સર્વસંહારતાણ્ડવમ્ ।
ધ્યાયેન્માયાઞ્ચ એહ્યેહિ ધ્વનિમન્ત્રં સમુચ્ચરેત્ ॥ ૩॥

ઓઙ્કારપઞ્જરાવાસં ઓઙ્કારાકારભાસુરમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૪॥

હ્રીઙ્કારરૂપિણીનેત્ર ષડઙ્ઘ્રિકમલાનનમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૫॥

એજજ્જગદધીશાનં એધમાનપ્રભાવલિમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૬॥

હિરણ્મયસભાન્તસ્સ્સ્થં હિમવત્તનયાપતિમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૭॥

એણાઙ્કુજ્વલનાર્કાક્ષં એનોનાશકરં પ્રભુમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૮॥

હિમોદચન્દનસ્નાનનિર્મલીકૃતવિગ્રહમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૯॥

શિવં શિવપ્રદાતારં શિતિકણ્ઠં શિવાન્વિતમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૦॥

વરિષ્ઠં સર્વદેવાનાં વરદં વશિસંસ્તુતમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૧॥

શિશોઃ ક્ષીરપ્રદાતારં શિલાદતનયાર્ચિતમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૨॥

વસિષ્ઠભગિનીપૂજ્યં વલારિવિજયપ્રદમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૩॥

શરોદ્ભવસ્ય જનકં શરચ્ચન્દ્રનિભાકૃતિમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૪॥

રસારથં રસેશેષું રવિચન્દ્રરથાઙ્ગકમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૫॥

ણાન્તા(૨) દિક્કોઘદર્ણાલિમૃષ્ટસંશીતિતાપસમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૬॥

શિપિવિષ્ટં શ્રિયા વન્દ્યં શિષ્ટાનામિષ્ટદાયકમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૭॥

વાતાશનેન્દ્રાભરણં વાતાશવરપૂજિતમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૮॥

નન્દિના નગસંસ્થેન નતં નારાયણેન ચ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૧૯॥

દન્તિચર્મપરીધાનં દક્ષાધ્વરવિનાશકમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૦॥

શિઞ્જન્મઞ્જીરપાદાબ્જદર્શનેન વિમુક્તિદમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૧॥

વદાન્યં સર્વદા નૃણાં વલ્મીકેશયભૂષણમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૨॥

(૨. ણાન્તાદિક્કા ઢક્કા વાદ્યવિશેષઃ ।)

શિલાદાય સ્વરૂપાઢ્યતનયપ્રદમવ્યયમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૩॥

વસુદેવસુતારાધ્યં વસુદાનરતં વિભુમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બર સભાનટમ્ ॥ ૨૪॥

શિખાગ્રવિલસચ્ચન્દ્ર શીતીકૃતદિગન્તરમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૫॥

વામદેવં વામદેહં વારિરાશીષુધિં શિવમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૬॥

યવિષ્ઠં યમિનાં ગમ્યં યજ્ઞભોક્તારમીશ્વરમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૭॥

શિરોભિરીડિતં સર્વચ્છન્દસાં શિખિલોચનમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૮॥

વારિદાલિલસત્કણ્ઠં વાસવાર્ચિતપાદુકમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૨૯॥

યં વિરાઢૃદયાન્તસ્સ્થં દૃષ્ટ્વા મુક્તો ભવેન્નરઃ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૩૦॥

નટરાજં નદીશીર્ષં નરનારાયણાર્ચિતમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૩૧॥

મરુદાદિજગત્સૃષ્ટિકૃદન્વેષિતમસ્તકમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બરસભાનટમ્ ॥ ૩૨॥

ધ્વનિમનુસ્તવમિમં વિશેષતો નટપતેઃ પુરતઃ પ્રતિવાસરમ્ ।
પઠતિ યઃ પુરુષાર્થચતુષ્ટયં ઝટિતિ યાતિ સ શિવપ્રસાદતઃ ॥ ૩૩॥

આદાવુદિતષટ્શ્લોકીં પ્રાતિલોમ્યેન કીર્તયેત્ ।
બ્રહ્મ માયાં ચ એહ્યેહીત્યુક્ત્વા ધ્વનિમનું જપેત્ ॥ ૩૪॥

ઇતિ શ્રીચિદમ્બર શિવશક્તિધ્વનિમન્ત્રસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

---

*Shri Chidambara Shivashakti Dhvani Mantra Stava*
pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*